# Shri Bhuvaneshvai Ashtottarashatanama Stotram

# શ્રીભુવનેશ્વર્યષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : bhuvaneshvaryaShTottarashatanAmastotram 1

File name : bhuvaneshvaryaShTottarashatanAmastotram1.itx

Category : aShTottarashatanAma, devii, devI, dashamahAvidyA

Location : doc_devii

Transliterated by : Shree Devi Kumar

Proofread by : PSA Easwaran

Description/comments : See corresponding nAmAvalI

Acknowledge-Permission: Mahaperiaval Trust

Latest update : July 2, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 8, 2024

*sanskritdocuments.org*

# શ્રીભુવનેશ્વર્યષ્ટોત્તરશતનામસ્તોત્રમ્

કૈલાસશિખરે રમ્યે નાનારત્નોપશોભિતે ।
નરનારીહિતાર્થાય શિવં પપ્રચ્છ પાર્વતી ॥ ૧॥

દેવ્યુવાચ -
ભુવનેશીમહાવિદ્યાનામ્નામષ્ટોત્તરં શતમ્ ।
કથયસ્વ મહાદેવ યદ્યહં તવ વલ્લભા ॥ ૨॥

ઈશ્વર ઉવાચ -
શ‍ૃણુ દેવિ મહાભાગે સ્તવરાજમિદં શુભમ્ ।
સહસ્રનામ્નામધિકં સિદ્ધિદં મોક્ષહેતુકમ્ ॥ ૩॥

શુચિભિઃ પ્રાતરુત્થાય પઠિતવ્યં સમાહિતૈઃ ।
ત્રિકાલં શ્રદ્ધયા યુક્તૈઃ સર્વકામફલપ્રદમ્ ॥ ૪॥

અસ્ય શ્રીભુવનેશ્વર્યષ્ટોત્તરશતનામસ્તોત્રસ્ય શક્તિરૃષિઃ
ગાયત્રી છન્દઃભુવનેશ્વરી દેવતા ચતુર્વર્ગસાધને જપે વિનિયોગઃ ।

ૐ મહામાયા મહાવિદ્યા મહાભોગા મહોત્કટા ।
માહેશ્વરી કુમારી ચ બ્રહ્માણી બ્રહ્મરૂપિણી ॥ ૫॥

વાગીશ્વરી યોગરૂપા યોગિનીકોટિસેવિતા ।
જયા ચ વિજયા ચૈવ કૌમારી સર્વમઙ્ગલા ॥ ૬॥

હિઙ્ગુલા ચ વિલાસી ચ જ્વાલિની જ્વાલરૂપિણી ।
ઈશ્વરી ક્રૂરસંહારી કુલમાર્ગપ્રદાયિની ॥ ૭॥

વૈષ્ણવી સુભગાકારા સુકુલ્યા કુલપૂજિતા ।
વામાઙ્ગા વામચારા ચ વામદેવપ્રિયા તથા ॥ ૮॥

ડાકિની યોગિનીરૂપા ભૂતેશી ભૂતનાયિકા ।
પદ્માવતી પદ્મનેત્રા પ્રબુદ્ધા ચ સરસ્વતી ॥ ૯॥

ભૂચરી ખેચરી માયા માતઙ્ગી ભુવનેશ્વરી ।
કાન્તા પતિવ્રતા સાક્ષી સુચક્ષુઃ કુણ્ડવાસિની ॥ ૧૦॥

ઉમા કુમારી લોકેશી સુકેશી પદ્મરાગિણી ।
ઇન્દ્રાણી બ્રહ્મ ચાણ્ડાલી ચણ્ડિકા વાયુવલ્લભા ॥ ૧૧॥

સર્વધાતુમયીમૂર્તિર્જલરૂપા જલોદરી ।
આકાશી રણગા ચૈવ નૃકપાલવિભૂષણા ॥ ૧૨॥

નર્મદા મોક્ષદા ચૈવ ધર્મકામાર્થદાયિની ।
ગાયત્રી ચાથ સાવિત્રી ત્રિસન્ધ્યા તીર્થગામિની ॥ ૧૩॥

અષ્ટમી નવમી ચૈવ દશમ્યેકાદશી તથા ।
પૌર્ણમાસી કુહૂરૂપા તિથિમૂર્તિસ્વરૂપિણી ॥ ૧૪॥

સુરારિનાશકારી ચ ઉગ્રરૂપા ચ વત્સલા ।
અનલા અર્ધમાત્રા ચ અરુણા પીતલોચના ॥ ૧૫॥

લજ્જા સરસ્વતી વિદ્યા ભવાની પાપનાશિની ।
નાગપાશધરા મૂર્તિરગાધા ધૃતકુણ્ડલા ॥ ૧૬॥

ક્ષત્રરૂપા ક્ષયકરી તેજસ્વિની શુચિસ્મિતા ।
અવ્યક્તા વ્યક્તલોકા ચ શમ્ભુરૂપા મનસ્વિની ॥ ૧૭॥

માતઙ્ગી મત્તમાતઙ્ગી મહાદેવપ્રિયા સદા ।
દૈત્યહા ચૈવ વારાહી સર્વશાસ્ત્રમયી શુભા ॥ ૧૮॥

(ફલશ્રુતિઃ)
ય ઇદં પઠતે ભક્ત્યા શૃણુયાદ્વા સમાહિતઃ ।
અપુત્રો લભતે પુત્રં નિર્ધનો ધનવાન્ ભવેત્ ॥ ૧૯॥

મૂર્ખોઽપિ લભતે શાસ્ત્રં ચોરોઽપિ લભતે ગતિમ્ ।
વેદાનાં પાઠકો વિપ્રઃ ક્ષત્રિયો વિજયી ભવેત્ ॥ ૨૦॥

વૈશ્યસ્તુ ધનવાન્ભૂયાચ્છૂદ્રસ્તુ સુખમેધતે ।
અષ્ટમ્યાઞ્ચ ચતુર્દશ્યાં નવમ્યાં ચૈકચેતસઃ ॥ ૨૧॥

યે પઠન્તિ સદા ભક્ત્યા ન તે વૈ દુઃખભાગિનઃ ।
એકકાલં દ્વિકાલં વા ત્રિકાલં વા ચતુર્થકમ્ ॥ ૨૨॥

યે પઠન્તિ સદા ભક્ત્યા સ્વર્ગલોકે ચ પૂજિતાઃ ।

રુદ્રં દૃષ્ટ્વા યથા દેવાઃ પન્નગા ગરુડં યથા ॥

શત્રવઃ પ્રપલાયન્તે તસ્ય વક્ત્રવિલોકનાત્ ॥ ૨૩॥

ઇતિ શ્રીરુદ્રયામલે દેવીશઙ્કરસંવાદે
શ્રીભુવનેશ્વર્યષ્ટોત્તરશતનામસ્તોત્રમ્ ॥

Proofread by PSA Easwaran

*Shri Bhuvaneshvai Ashtottarashatanama Stotram*

pdf was typeset on June 8, 2024

Please send corrections to *sanskrit@cheerful.com*